

Jagadguru Sriman Madhwacharya Moola Maha Samastana
Sri Rajendratheertha Poorvadimatheeya

**SRI SRI VYASARAJA MUTT (SOSALE)**

Thirumakudlu, T. Narasipura Taluk, Byrapura Post, Mysuru District, Karnataka



Sri Sri 1008
Sri Vidyasreesha Tirtharu

ब्राह्मणोपनिषन्मन्त्रभेदा वेदगिरोऽखिलाः ।
यत्क्रीडाभूमयस्तस्मै परस्मै ब्रह्मणे नमः ॥

त्रिवर्गपुरुषार्थत्वेन प्रथितेषु धर्मार्थकामेषु धर्मो हि प्रधानः । धर्माविरुद्धश्चेदेवार्थः कामश्च पुरुषार्थौ भवतः । स चायं धर्मः परम्परया चतुर्थपुरुषार्थस्य मोक्षस्य साधकश्च । 'धर्मो विश्वस्य जगतः प्रतिष्ठा' इति श्रुतिः सोऽयं धर्मः समग्रस्यास्य विश्वस्य प्रकृष्टस्थितिकारणम् इत्याह । एवं जगद्धारकत्वादेव धर्म इत्यन्वर्थं नाम । अतीन्द्रियोऽयं धर्मः वेदैकवेद्य इति 'वेदोऽखिलो धर्ममूलम्' इत्यब्रवीन्मनुः । धर्मस्यास्य विवेकार्थमेव भगवान् जैमिनिः द्वादशलक्षणीं प्रणिनाय । तत्र हि प्रथमं सूत्रम् – अथातो धर्मजिज्ञासेति । वेदाध्ययनानन्तरं तदध्ययनस्यार्थज्ञानरूपदृष्टार्थकत्वाद् धर्मस्य वेदार्थस्य विचारः कर्तव्यः । अतो धर्मविचारार्थं मीमांसाशास्त्रमिदमारम्भणीयमिति सूत्रतात्पर्यम् ।

सोऽयं वेदार्थः याज्ञिकः, ऐतिहासिकः, आध्यात्मिकश्चेति त्रिविध इत्याह यास्काचार्यः। त्रिष्वेतेष्वर्थेषु आध्यात्मिकार्थस्यैव प्राधान्यमित्यत्र नास्ति वैमत्यम् । प्राचीनभाष्यकारैरर्थान्तरपरत्वेन वेदमन्त्राणां व्याख्यानस्य कृतत्वेऽपि तत्र तत्राध्यात्मपरतयाऽपि व्याख्यातं कृतमित्येतदस्मदवधानमर्हति । श्रीमदानन्दतीर्थभगवत्पादाचार्यास्तु न केवलम् उपनिषदां, किन्तु मन्त्रब्राह्मणाद्यात्मकस्य समग्रस्य वैदिकवाङ्मयस्य परब्रह्मण्येव मुख्यत्वं प्रतिपादयन्तः ऋग्वेदीयप्रथमाध्यायत्रयस्याध्यात्मपरं व्याख्यानं स्वीये ऋग्भाष्ये चक्रिरे ।

वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः ॥

इति प्राचीनसूक्तिरपि इममेवाशयं पुष्णाति । अर्वाचीना दयानन्दारविन्दप्रभृतयोऽपि वेदानामध्यात्मपरत्व एव स्वीयं नैर्भर्यं समसूचयन् । अध्यात्मगन्धविधुरा गुरुपरम्परासम्प्राप्तभारतीयधर्मसंस्कृतिसंस्कारहीना वैदेशिकाः प्रकृतिवैचित्र्यदर्शनेन विस्मितानां प्राचीनानां मनुजानाम् उद्गारा एवेमानि वेदवाक्यानीति मन्वानाः तेषामेकवाक्यतामपलपन्तः आपातप्रतीतार्थकतामेव तेषामभिप्रयन्ति ।

एवं विविधवेदव्याख्यानप्रसूतमालायां नूतनमिदं कुसुमं ध्वनिदीपिकाख्यं संयोजितमस्ति वेदविद्याप्रवीणेन श्रीरङ्गनाथसूरिणा । प्राचीनानां व्याख्यानापेक्षयाऽस्मिन् व्याख्याने अस्ति किञ्चिद्वैशिष्ट्यम् । अत्र हि सरलया शैल्या प्रतिपदव्याख्यानेन मन्त्रार्थः विनाऽयासं स्फुटं प्रतीयते । तत्र तत्राध्यात्मिकम् अर्थान्तरमपि सूच्यते । प्राचीनभाष्याणामध्ययनात् प्रागस्य व्याख्यानस्यावलोकनं विशेषतो वेदार्थविमर्शनकुतूहलिनां नितान्तं साहाय्यमातनोतीति व्याख्यानस्यास्य रचयितारं स्वनामधन्यं रङ्गनाथसूरिमहाभागं हार्दम् अभिनन्दयामः ।

अस्मदाराध्यः भैष्मीसत्यासमेतः श्रीगोपालकृष्णः वैदिकविद्वदग्रेसरमेनं समनुगृह्णात्विति प्रार्थयामः ।

श्रीविद्याश्रीशतीर्थः
श्री विद्याश्रीशतीर्थाः
श्रीव्यासराजमठः (सोसले)

Scanned with CamScanner